No. १३३३

Title समानाधिकरण्य ज्ञानमात्र कारणताविचारः

Author x

Extent ५ Age x

Subject न्यायशास्त्रं

सामानाधिकरण्य ज्ञान मात्र कारणता विचारः

...व्याप्तिर्विषयतेत्यलम्। अनुमितौ साध्यव्याप्तिविशिष्टहेतुमत्तापरामर्शत्वेन न हेतुता अपि तु लाघवात् साध्यसामानाधिकरण्यविशिष्टहेतुमत्ताज्ञा
...व्यभिचारज्ञानदशायामनुमितिवारणायानुमितौ साक्षादेव व्यभिचारज्ञानस्य प्रतिबन्धकत्वं कल्प्यते यच्च व्यभिचाराव्यभिचारयोरुभयोरे
...तत्राप्रसिद्ध्या साध्यसामानाधिकरण्यविशिष्टहेतुमत्ताज्ञानसत्त्वेऽनुमितिर्भवेत् न। अथ व्यभिचारज्ञानस्य स्वातन्त्र्येण कारणत्वान्तरकल्पनापेक्ष
या ...हेतुमत्ताज्ञानहेतुतायामेवाव्यभिचाररूपव्याप्तिविषयता विषयतानिवेशो लघीयान् न चैवं व्याप्त्यंशसंशयात्मकज्ञानादनुमितिवा
...कारणतावच्छेदककोटौ व्याप्त्यंशनिश्चयत्वं निवेश्यं तच्च व्याप्त्यभावाप्रकारकत्वे सति व्याप्तिप्रकारकत्वं तत्रोभयोर्दलयोर्विशेषणवि
शेष्यभावे विनिगमनाविरहेण कारणताद्वयापत्तिरिति संशयसाधारण्यव्यभिचारज्ञानस्य पृथक् प्रतिबन्धकत्वमेवोचितमिति वाच्यम्।
व्याप्तिविशिष्टविशिष्टविषयताशालितामात्रनिवेशेनैव कारणताकल्पनात् व्याप्त्यंशे संशयस्य च व्याप्तिविशिष्टवैशिष्ट्यावगाहित्वात्
तादृशानुमित्यापत्तिविरहेण व्याप्त्यंशे निर्णीतत्वानिवेशात् निविशतां वा व्याप्त्यंशनिश्चयत्वं तथापि व्यभिचारज्ञानप्रतिबन्धकतामते गौ
रवं यतस्तन्मते व्यभिचारग्रहेऽप्रामाण्यसंशयेऽनुमित्युत्पत्तयेऽप्रामाण्यग्रहस्यापि निर्णायकत्वेन धीविशेषकत्वं स्वीकरणीयं ममानुसंश
यसाधारण्याप्रामाण्यग्रहत्वावच्छिन्नाभावत्वेनैव व्यभिचारनिर्णयहेतुतायामतिविशाले अव्यभिचारनिर्णये अप्रामाण्यज्ञानसत्त्वेऽपि तज्ज्ञा
नस्य संशयसामग्रीतयाऽनुमित्यनुत्पादात् अव्यभिचारज्ञानीयव्यभिचाराप्रकारकत्वरूपनिर्णयत्वापेक्षया तदंशेऽप्रामाण्यज्ञा
नीयनिर्णयत्वस्य व्यभिचाराभाववद्विशेष्यकत्वावच्छिन्नव्यभिचारप्रकारकत्वाभावाप्रकारकत्वरूपस्य शरीरगौरवं न स्फुरत्येव न च भवन्म

सा॰तु॰

तेऽव्यभिचारनिर्णयविशेष्यतीभूतत्ताभावप्रतियोगितिसंशयसाधारणाप्रामाण्यग्रहेऽप्रामाण्यग्रहांतरस्याभावेनिवेशनीये निर्णयत्वेनैवतदभावोनि
वेशनीयः अप्रामाण्यसंशयास्कंदिताप्रामाण्यग्रहसत्वेप्यनुमित्यनुदयात् मन्मतेतुव्यभिचारज्ञानोत्तेजकीभूताप्रामाण्यानिर्णयसंशयसा
धारणाप्रामाण्यग्रहत्वावच्छिन्नाभावएवनिवेश्यते अप्रामाण्यसंशयास्कंदितस्यापि निर्णयस्याप्रयोजकत्वादितिलाघवमितिवाच्यं॰
अनवस्थाभयेनाप्रामाण्यग्रहेऽप्रामाण्यग्रहांतरस्यैवानिवेशात् परामर्शादावप्रामाण्यग्रहसत्वे तत्रचाप्रामाण्यग्रहांतरसत्वेप्यनुमि
त्यादेरनंगीकारात् मेवं अव्यभिचारज्ञानेहेतुतायामव्यभिचाराभाववत्तिव्यभिचारप्रकारकत्वं व्यभिचारवत्यव्यभिचारप्रकारकाप्रा
माण्यग्रहयोर्द्वयोरभावद्वयंनिवेशनीयं अव्यभिचाराभावस्यव्यभिचाररूपत्वेऽव्यभिचाराभावत्वावच्छिन्नविषयताव्यभिचाराभा
वत्वावच्छिन्नविषयतयोरनुगतरूपेणानिवेशासंभवात् नतावद्द्विविधाप्रामाण्यग्रहयोरनुगतत्वानतिप्रसक्तधर्मावच्छिन्नैकाभा
वनिवेशासंभवात् नहितादृशविषयतायाव्यभिचारविषयतात्वेनानुगमः संभवति प्रमेयत्वादिनाव्यभिचारविषयताकस्यप्रमेय
त्वेचेत अव्यभिचारप्रकारकमित्येतादृशज्ञानस्यवारणायाव्यभिचारत्वादिरूपविशेषानिवेशनस्यावश्यकत्वात् व्यभिचारज्ञान
प्रतिबंधकतामतेतुतत्रव्यभिचाराभाववत्तिव्यभिचारप्रकारकमित्येतादृशस्यैकविधस्यैवाप्रामाण्यग्रहस्याभावनिवेशनमिति
लाघवमपि एवमव्यभिचारविषयतायाहेतुमत्ताज्ञानकारणतायांतुविशेषोऽव्यभिचारांशीयाप्रामाण्यग्रहाभावहेतुमत्तांशी
याप्रामाण्यग्रहाभावानामेकत्रनिवेशनीयतयामिथोविशेष्यविशेषणभावेविनिगमनाविरहेणकारणतावाहुल्यापत्तेरेवं राम:

नचभवन्मतेपिसामानाधिकरण्यांशीयाप्रामाण्यग्रहाभावहेतुमत्तांशीयाप्रामाण्यग्रहाभावानामेकत्रनिवेशात्सामान्यमितिवाच्यंव्याप्तेर
व्यभिचरितसामानाधिकरण्यरूपतयासामानाधिकरण्यांशीयाप्रामाण्यग्रहाभावनिरूपकत्वविशेषणीभूतताकसामान्यमितिविशेषस्यभ
वन्मतेप्यावश्यकत्वात् अव्यभिचारांशेऽप्रामाण्यग्रहाभावनिवेशस्याधिकतयातेनसमंहेतुमत्तांशीयाप्रामाण्यग्रहाभावस्यविशे
षणविशेष्यभावेविनिगमनाविरहस्यतुल्यगौरवस्याप्रतीहारात् अस्तुवासामानाधिकरण्यघटितमव्यभिचारित्वंसेवव्या
प्तिः तथापिसामानाधिकरण्यापेक्षयाऽव्यभिचारस्यानेकपदार्थघटिततयातदीयाप्रामाण्यग्रहाणांबहुविधतयातन्मते
बहुविधाप्रामाण्यग्रहाभावैःसमंहेतुमत्तांशीयाप्रामाण्यग्रहाभावस्यविशेष्यविशेषणभावेविनिगमनाविरहस्यदुर्वारत्वात् अ
स्माकंपुनस्तेनैवेतिलाघवमस्तुसममेवेति अथभवतांसाध्याभाववदवृत्तित्वेहेतुःहेतुसमानाधिकरणाभावप्रतियोगिताव
च्छेदकमित्यादिनानाविधव्यभिचारज्ञानानांप्रतिबन्धकताकल्पनंतथाविधैकविधव्यभिचारज्ञानकालेऽनुमित्युदयादि
तिगौरवं ममतुहेतुरूपैकविधसाध्याभाववदवृत्तित्वरूपव्याप्तिज्ञानस्यैवहेतुताकल्पनमितिचेन्न हेतुसमानाधिकरणा
भावप्रतियोगितावच्छेदकंसाध्यतावच्छेदकमित्येतादृशव्यभिचारज्ञानसत्त्वेतादृशव्याप्तिज्ञानकालेभवतामेवकथंनानु
मितिः नह्यप्रामाण्याभावानवगाहिनस्तत्वेतादृशव्यभिचारज्ञानस्यसाध्याभाववदवृत्तित्वरूपव्याप्तिज्ञानविरोधितायांकिं
चित्प्रमाणमस्तियेनतदानींप्रतिबन्धकसत्त्वाद्व्याप्तिज्ञानमेवनजायतेऽतोनानुमितिः कारणविरहादितिवक्तव्यम् अथतादृ
शव्यभिचारज्ञानसत्त्वेसाध्याभाववदवृत्तित्वरूपव्यभिचारज्ञानमपिप्रायशःसामग्रीवशाज्जायते एवंचग्राह्याभावावगाहितादृश

सा॰नु॰

२ व्यभिचारज्ञानस्य प्रतिबंधकसत्वेन साध्याभाववद्वृत्तित्वस्य व्याप्तिज्ञानानुत्पत्त्या न तदानीमनुमितिरित्युच्यते यत्र च हेतुसमानाधिकरणाभावप्रतियोगितावच्छे
दकं साध्यतावच्छेदकमित्येतादृशज्ञानसत्वेपि यल्लिंगिकारणविरहेण तादृशव्यभिचारज्ञानमपि नोत्पद्यते तदानुमितिरिष्यत एवेति चेत्तर्हि मन्मतेपि लघु
2 शरीरसाध्याभाववद्वृत्तित्वरूपव्यभिचारज्ञानमेव प्रतिबंधकं यत्र चानेनादृशव्यभिचारज्ञानं तत्रान्यादृशव्यभिचारज्ञानसत्वेपि भवन्मतइवास्मन्मतेप्येवा
नुमितिः अस्तु वा मानोविषयव्यभिचारज्ञानमेवानुमितिप्रतिबंधकं तथाप्येतन्मते लाघवमस्तु समं वेति तथाहि व्याप्तिज्ञानहेतुतामतेऽनंतपक्षभेदेना
पि विभिन्नहेतुमत्ताज्ञानहेतुता गौरवगुरुशरीरव्यभिचारविषयतातादृशीयाप्रामाण्यग्रहाभावस्य निवेशनीया तच्चाचानंतकारणताबाहुल्यं मम
तु लघुशरीरसाध्याभावसामानाधिकरण्यविषयतायाः स्वरूपतस्तद्प्रामाण्यग्रहाभावांशो निवेशः पक्षभेदेन स्वल्पतरकारणभाकल्पने व्यभिचा
रज्ञानाभावस्य च त्रिचतुरादिमात्रकारणताधिक्यं न च धूमोवह्निव्यभिचारज्ञानदशायामप्यालोकादिलिंगकानुमित्युत्पत्त्या तथानुमिति
त्वेन प्रतिबध्यतावच्छेदकावाच्यं धूमादिलिंगकत्वं च धूमनिर्णयजन्यत्वमिति पक्षविशेषनिवेशस्यावश्यकतया पक्षभेदेन व्यभिचारज्ञानाभाव
कारताभेद आवश्यक इति वाच्यं धूमवत्ताज्ञानजन्यत्वनिवेशेनैवोपपत्तौ पक्षविशेषनिवेशप्रयोजनविरहात् वस्तुतस्तु न धूमवत्ताज्ञानज
न्यत्वनिवेशोपि धूमालोकोभयसमूहालंबनजन्यानुमितौ व्यभिचारस्यावश्यकतया तद्वारणाय व्यभिचारज्ञानानुत्तरत्वमवश्यं व्यभिचा
रज्ञानाभावजन्यतावच्छेदककोटौ निवेशनीयं एवं च तत एव सर्वत्र सामंजस्ये प्रयोजनाभावेन तत्प्रवेशो नास्तीत्यवधेयम् अथैवं व्यभि
चारज्ञानस्य प्रतिबंधकत्वे न समवायेन ज्ञानस्याव्याप्यवृत्तितया व्यभिचारज्ञानदशायामपि समवायसंबंधावच्छिन्नप्रतियोगिताकत
दभावसत्वेनानुमित्यापत्तेः नाप्यवच्छेदकतया महाशरीरनाशदशायां तदवच्छेदेन यत्र व्यभिचारज्ञानं तदुत्तरं खंडशरीरोत्पत्तिस्तत्र तदुत्तरं त रामः
दवच्छेदेनानुमित्यापत्तेः खंडशरीरावच्छेदेन व्यभिचारज्ञानाभावादिति व्यभिचारज्ञानस्य प्रतिबंधकताघटकसंबंधस्य निर्वक्तुमशक्यतयाऽनाप २

साऽव्यभिचारज्ञानस्य हेतुतास्वीकरणीयेति चेन्न। अवच्छेदकत्वमेव प्रतिबंधकताशरीरघटकः संबंधः नहि महाशरीरनाशदशायां व्यभिचारज्ञानमुत्पद्यते येनोक्तानुपपत्तिः स्यात्
अन्यज्ञानत्वावच्छिन्नं प्रति शरीरस्य कार्यसहभावेन हेतुत्वोपगमादिति नोक्तानुपपत्तिः अथवाऽवच्छेदकतासंबंधेनानुमितिं प्रति स्वावच्छेदकसमवेतत्वसंबंधेन व्यभिचारज्ञा
नं प्रतिबंधकं महाशरीरावच्छिन्नव्यभिचारज्ञानमपि खंडशरीरे वर्त्तते खंडशरीरस्य महाशरीरावयवसमवेतत्वादिति नानुपपत्तिः यद्वा समवायसंबंधेनानुमितिं प्रति
स्वसमानाधिकरणैकत्ववत्त्वसंबंधेन व्यभिचारज्ञानस्य प्रतिबंधकता न चैतादृशसंबंधेन ज्ञानमव्याप्यवृत्तिर्येनो प्रागुक्तानुपपत्तिः स्यात् स्वसमानाधिकरणप
रिमाणवत्त्वसंबंधेन तादृशैकपृथक्त्वसंबंधेन च प्रतिबंधकतामादाय विनिगमनाविरहो नाशंकनीयः आत्मपरिमाणपृथक्त्वोपगमे मानाभावात् तादृशसं
योगसंबंधेन तथात्वमादाय विरहोऽपि नाशंकनीयः संयोगादीनामव्याप्यवृत्तितया तद्घटितसंबंधेन ज्ञानादेरपि तथात्वात् अस्तु वा तादृशविनिगमनाविरहा
त्प्रतिबंधकताबाहुल्यं तावतामप्युपदर्शितानंतकारणतानुरोधेन गुरुत्वलाघवं प्रत्यास्यातुमशक्यमेव। यत्तु कायव्यूहदशायामेकस्मिन्नात्मन्यपि भिन्नशरीराव
च्छेदेन व्यभिचारज्ञानदशायामन्यशरीरावच्छेदेनानुमित्युत्पादनात्मनिष्ठप्रत्यासत्त्या प्रतिबध्यप्रतिबंधकभावः संभवतीति तदपि न तादृशस्थलेऽनुमि
त्युत्पादे प्रमाणाभावादित्याहुः अत्रोच्यते व्यभिचारप्रतिबंधकतामते हेतुतावच्छेदकभेदेन तत्प्रतिबंधकताबाहुल्ये आलोकघवच्छिन्ने व्यभिचारज्ञान सा
दशायां धूमालोकत्वाद्यवच्छिन्नलिंगकानुमित्युत्पत्तिहेतुतावच्छेदकमनिवेश्य सामान्यतः साध्याभाववद्वृत्तित्वप्रकारकज्ञानत्वेन प्रतिबंधकत्वकल्पन
संभवात् एवं हेतुमत्ताज्ञानस्यापि हेतुतावच्छेदकभेदेन कारणताबाहुल्ये तदनिवेश्य साध्यसामानाधिकरण्यज्ञानत्वेन हेतुत्वे धूमो वह्निव्यभिचारी
त्येतादृशज्ञानकाले साध्यसमानाधिकरणालोकवान्पर्वत इति ज्ञानादालोकादिलिंगकानुमित्युत्पत्त्या तादृशसामग्र्या धूमो वह्निव्यभिचारी
त्येतादृशज्ञानदशायां वह्निसमानाधिकरणधूमवान्पर्वत इत्येतादृशहेतुमत्ताज्ञानमात्रसत्त्वेऽप्यनुमित्यापत्तिरिति व्याप्तिज्ञानहेतुतामते च

हेतुतावच्छेदककमनिवेशे साध्यव्याप्यतावच्छिन्नप्रकारताशालिज्ञानत्वेनैव हेतुताकल्पनं संभवतीति तन्निहेतुतावच्छेदककोटौ भेदस्य परामर्शकारणताभेदप्रतिलाघवं ह्येवं व्यभिचारज्ञा
नस्यानुमितिप्रतिबंधकतामते व्यभिचारज्ञानाभावस्यानुमितिमात्रे निवेशनीयतया व्यभिचाराबोधाभावे हेतुमत्ताज्ञानादिसहस्रेणापि स्पष्टं विशेषणविशेष्य
भावे विनिगमनाविरहेणानंतकारणतावाकल्प्यं समवनुत व्यभिचारविरहयुतायाहेतुमत्ताज्ञाननिवेशाधिकं तस्यानयेहेतौ विशेषणतया विशेष्यतास
त्वासंभवान्न विनिगमनाविरहेण कारणतावाकल्प्यमिति अथ व्यभिचारज्ञानप्रतिबंधकतामते धूमो वह्निव्यभिचारीत्याकारकशाब्दबोधादौ वह्नि
व्यभिचारि धूमवान्पर्वत इत्याकारकविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षादौ च वह्न्यादिलिंगकवह्न्याद्यनुमितिसामग्र्याः प्रतिबंधकत्वानकल्प्यते अनुमितिसाम
ग्रीकाले व्यभिचारज्ञानाभावस्यावश्यकत्वेन योग्यताज्ञानविशेषणज्ञानादिरूपकारणविरहेणैव तादृशशाब्द विशिष्टवैशिष्ट्यबोधादीनामापत्त्यभा
वात् व्याप्तिज्ञानहेतुतामते यत्र धूमो वह्निव्यभिचारी न वेत्याकारकसंशयानंतरं वह्निव्याप्यधूमवान्पर्वत इत्याकारकपरामर्शस्तत्र शाब्दबोधजनकीभू
तेतरकारणसमवधाने तदनंतरं वह्न्यनुमितिस्तत्रानुमित्युत्पत्तिकाले तादृशशाब्दबोधापत्तिः कारणं यत्र च भाविव्यभिचारज्ञानमप्रामाण्यग्रहःद्वि
तीयक्षणे धूमो वह्निव्यभिचारीत्याकारकविशेषणतावच्छेदकप्रकारकनिर्णयस्तदनंतरं वह्निव्याप्यधूमवान्पर्वत इत्याकारकपरामर्शो व्यभिचारीत्या
कारकपरामर्शे व्यभिचारज्ञानस्याप्रामाण्यग्रहनाशात्तदुत्तरं तत्र वह्न्यनुमित्युत्पत्तिरिति रूपेणोपदर्शितविशिष्टवैशिष्ट्यबोधकारणाय तत्राप्यनुमिति
सामग्र्याः प्रतिबंधकत्वकल्पनमावश्यकमिति गौरवं तादृशशाब्दबोधे विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षादौ प्रतिबंधकताधिक्यमिति तु नाशंकनीयं इत्थं हि वि
शेषाणां पृथक्पृथक्तेजःकत्वस्यावश्यकतया अनुगतरूपेण प्रतिबध्यप्रतिबंधकभावासंभवादिति चेत्स्यादेतत् यदि लिंगभेदेनानुमितिसामग्रीप्रतिबंधकताभेदः
स्यात् न चैवं धूमालोकादिलिंगकपरामर्शत्वेन व्याप्यतावच्छिन्नप्रकारताशालिज्ञानत्वेनानुगतरूपेणैव सामग्रीप्रतिबंधकतायां निवेशसंभवात् धूमालोकादि रामः
लिंगकैकवह्न्याद्यनुमितिसामग्र्या एकैकविधप्रतिबंधकतयैवोपपत्तेः न चैवमुपदर्शितमतेऽपि संभवति धूमालोकादिलिंगकानुमितिसामग्रीकाले तूपदर्शि

तथाप्यद्वेषापत्तिवारणाय भयवादिकल्पनीयप्रतिबंधकत्वे मेयोपपत्तेः प्रतिबंधकत्वांतराविरहादिति वस्तुतस्तु तादृशगौरवसंभवेपि क्षतिविरहाद्व्याप्तिविशि
ष्टहेतुमत्ताज्ञानहेतुतावादिनांमते वह्निव्याप्यवान्पर्वतइत्याद्याकारकप्रत्यक्षशाब्दबोधादेः पर्वतपक्षकवह्न्यादिमितिसामग्र्याः प्रतिबंधकत्वकल्पने
नलाघवसंभवात् तथाहि अनुमितिसामग्रीकालेवह्निव्याप्यधूमवान्पर्वतइत्याकारकव्याप्तिज्ञानमावश्यकं तत्प्रोपदर्शितप्रत्यक्षादेर्बाधकत्वप्रत्यक्षत्वप्र
प्रतिबंधकतावच्छिन्नितद्धेतुत्वादसंभवइतिसामग्रीप्रतिबंधकतां[redacted]कल्पनेनिष्प्रयोजनकं व्यभिचारज्ञानप्रतिबंधकतामतेसामग्रीप्रतिबंधकताकल्पनमावश्यकं अन्यथावह्निसमानाधिकरणधू
मवान्पर्वतइत्याकारकसाध्यसामानाधिकरण्यविशिष्टहेतुमत्ताज्ञानप्रतिबंध्यवह्निसमानाधिकरणाभाववान्पर्वतइत्याकारकप्रत्यक्षादेः पर्वतादिपक्ष
कवह्न्याद्यनुमितिसामग्र्याः प्रतिबंधकत्वाकल्पनेव्यभिचारज्ञानप्रतिबंधकतामतेव्याघातमितितुनवाच्यं यतः सामानाधिकरण्यघटितव्याप्तिवादि
परामर्शप्रिये व हेतुमत्ताविश्चयत्वेनहेतुत्वमिति व्याप्तिव्यापकसामानाधिकरण्यरूपैवानुमितिप्रयोजिकान्तत्वेव्यभिचारितसामानाधिकरण्यप्र
पञ्चव्यभिचाररूपावासाध्याभावघटितायास्तस्याः केवलान्वयिसाधारण्याभावात् नाप्यन्योन्याधिकत्वरूपायावत्साध्यव्यापकत्वरूपायास्तस्या
स्तशरीरत्वात् व्यापकत्वंचस्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नत्वं तथाचपर्वतोवह्निमानित्यनुमितौ धूमसमाना
धिकरणाभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसमानाधिकरणधूमवानित्याकारकपरामर्शोहेतुः यद्रूपदर्शितान्तरितापेताभावघटितव्याप्त्य
पेक्षयास्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपान्योन्याभावघटितव्यापकत्वस्यलघुतयातद्घटितव्याप्तिज्ञानमेवहेतुरिति
तदसत् तथाहि चार्वाकीन्यायेननिखिलवह्न्यादीनामेवधूमसमानाधिकरणाभावप्रतियोगितावच्छेदकतानवच्छेदकत्वमेवनिवेशनीयं तथाचैक
वच्छेदकत्वांशनिवेशाधिक्येनान्योन्याभावघटितव्यापकत्वेवगुरुत्वमेव अतएवान्योन्याभावस्याव्याप्यवृत्तित्वद्घटितव्यापकताशरीरेभावांशेप्रतियो

सा०नि०
५

गिवैयधिकरण्यानिवेशेनलाघवमितिचेदस्तु प्रतियोगिवैयधिकरण्यानिवेशेन शरीरलाघवं तथापि कारणतावच्छेदककोटौ प्रतियोगिवैयधिकरण्यसंबंधावि
शेषावच्छिन्नत्वघटितनिवेशस्यावश्यकतया लाघवानवकाशः नच निरुक्तघटितत्वावच्छिन्नत्वादिना ज्ञानाभावमादायासंभववारणाय तत्ताभावप्रतियोगितावच्छेदक
तायां साध्यतावच्छेदकतावटकसंबंधावच्छिन्नत्वनिवेशस्यावश्यकत्वे असंताभावघटितव्यापकतावादिनो संयोगादिनावह्न्यादिसाध्यकस्थले निरुक्तघटितत्वावच्छि
घवच्छिन्नत्वाद्यनाद्यभेदादिकमादाय व्याप्तिवारणाय भेदप्रतियोगितावच्छेदकतायां साध्यतावच्छेदकतावटकसंबंधावच्छिन्नत्वनिवेशस्यावश्यकतया साम्यादिति
इदं तु तत्त्वम् साध्यसाधनसंबंधभेदेन व्यापकतायाः कार्यकारणभावस्य भेदात् संयोगादिना वह्निसाध्यकस्थले अन्योन्याभावघटितव्याप्तिज्ञानहेतुत्वमेवोचितं न
त्वतस्मात् एव लघुत्वात् तथाहि तत्रान्योन्याभावप्रतियोगितावच्छेदकतायां संबंधविशेषावच्छिन्नत्वनिवेशनमावश्यकं अन्यथावह्न्यादिविषयज्ञानादेःसंयोगसंबंधावि
करणसंबंधावच्छिन्नाभावमादायानुपपत्तिसादवस्थ्यात् तथात्यंताभावघटितव्यापकतायां प्रतियोगित्वतदवच्छेदकत्वयोः एकसंबंधावच्छिन्नत्वस्यावश्यं निवेशनी
यतयाः अन्योन्याभाव[illegible]घटितव्यापकतायां च प्रतियोगितायां संबंधविशेषावच्छिन्नत्वानिवेशेन लाघवं स्फुटमेव एवं च समवायादिना वह्न्यादिसाध्यकस्था
त्वहेतुमित्तत्त्वरूपादिकं साध्यं तत्रान्योन्याभावघटितव्यापकत्वमेव लघु तत्र साध्यस्य केवलान्वयित्वेपि हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतायाघ
टकविलक्षणसंबंधेन साध्यतावच्छेदकसंबंधभेदप्रतियोगितावच्छेदकत्वस्य निवेशनीयत्वात् प्रतियोगितावच्छेदकतावच्छेदकतयाः साध्यतावच्छेदकतावटकसंबंधावच्छि
न्नत्वानिवेशात् अतस्तत्रापि तादृशव्यापकत्वावगाहिपरामर्शएव हेतुः एवं च यत्रोपदर्शितरीत्यान्योन्याभावघटितव्याप्तेरेव लघुरूपतासंभवति तत्र यज्ज्ञा
नस्य पश्चात् अत्यंताभावघटितव्याप्तेस्तथात्वे तत्र तज्ज्ञानमेव हेतुरिति नियमएवलघीयान् नत्वास्तु व्यभिचरितत्वरूपव्याप्तिज्ञानमेवानुमितिहेतुः साध्याभा
ववद्वृत्तित्वरूपायास्तस्या व्यापकसामानाधिकरण्यापेक्षया लघुत्वात् केवलान्वयिन्यव्याप्तेरपि साध्याभावाप्रसिद्ध्या व्याप्तेरप्रसिद्धत्वेपि न क्षतिः अत्राभा राम४
वांशे प्रतियोगितया साध्यःपरत्वावगाहिनो व्याप्यत्वाभाववद्वृत्तित्वमानिसमवायत्वभ्रमात्मकपरामर्शादेव तत्रानुमित्युत्पत्तिसंभवात् अथ तत्र व्याप्तेरप्रसि ५

धाताद्यव्याप्तिविषयकज्ञानस्याप्रसिध्यातेनरूपेण हेतुज्ञानसंभवतीतिचेत्काक्षतिः नहि व्यापकत्वव्याप्तिविषयतां काभिन्नकप्रत्तान्वच्छेदककोटौ निवेशयति
किं तु वह्न्यंशः प्रसिद्धव्याप्तिविषयताघटकमेवेति न काचिद्व्यनुपपत्तिः अत्र केवलान्वयिसाध्यकानुमितिरेव न आपत्तेः साध्यस्य केवलान्वयित्वग्रहदशायाम
नुमित्सनुदयात् तत्राभावीयसाध्यस्य प्रतियोगितयाभावात् यदि केवलान्वयित्वमभावप्रतियोगित्वं साध्यविशेष्यकतज्ज्ञाने मानविशेष्यक
तयाऽभावांशे प्रतियोगितया साध्यप्रकारकत्वं निविरोधइति तदानीं साध्याभाववद्वृत्तित्वरूपव्याप्तिग्रहः संभवत्येवेति एवमन्यदप्यूह्यमित्रि संक्षेपः ॥ ॥
इति श्री सामानाधिकरण्यज्ञानमात्रे कारणता विचारः समाप्तः ॥ श्रीसीतापति विजयते तराम् ॥ सं॰ १८५२ मार्ग [illegible]

२०० सामानाधिकरण्यज्ञान मात्रकरणाविचार